7286

1. Title Kaśīmoksha Nirṇaya
2. Accession No. 5538
3. Folio No./Pages, 13
4. Lines 8
5. Size 31×11 Cm.
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit
9. Period Vs 1942, A. D. 1885
10. Beginning "श्री गणेशाय नमः नमस्कृत्य जगन्नाथ मातया चन्द्रशेखरम् गंगाधर शरण्डाया नील-कंठ..."
11. End "काशी मोक्ष निर्णय हथुआ महाराज बहादु-रंदयाया संसार के लिए समाप्त संवत् 1942 मि. चै. कृ. 3 ॥
12. Colophon yes
13. Illustrations No
14. Source Donation
15. Subject Dharma Śāstra
16. Revisor No
17. Author Not known
18. Remarks Papers are in good condition, with margin, bound. Printed under H. M. Maharaja Hathua.

KASI MOKSHA NIRNAYA

1885

G. K. V.

HARDWAR

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(1)

Kāśī Moksha Nirṇaya

सन् 1885

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

2

काशीमोक्षनिर्णय

3

[illegible]कृष्णनाम्नापेनल्हुआपुरवासिना मुद्रितोयं मुमुक्षूणां मुक्तये मोक्षनिर्णयः
[illegible]व्याख्यासहितोनेन विम्बशः पठ्यतां सदा सम्मनोसूर्यसत्वेवशोधनानवधानताम् २

श्रीकाशी विश्वनाथपुरी में ढुंढिराज गणेश के पास दाऊ अग्निहोत्री के सिद्ध विनायक
यन्त्र में काशी मोक्षनिर्णय छापा गया लि° बाबूराम शुक्ल छापनेवाला मान काशीजी
में ढुंढिराज गणेश पर मिलेगा। मि° चैत्रकृष्ण ५ प्रारम्भः सं° १९४२

0055538

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005538

का·मो·
नि·
१

॥श्रीगणेशायनमः॥ नमस्कृत्यजगन्नाथंमाययाचन्द्रशेखरम् गंगाधरंगरच्छायानीलकंठमुपास्महे १ वा
राणसींपुरींपुण्यांयेऽधितिष्ठंतिजंतवः॥ व्याचष्टेतारकंब्रह्मरुद्रस्तेषांदयानिधिः॥२॥ प्राणप्रयाणसमयेप्रा
प्यज्ञानंमहेश्वरात॥ मुच्यंतेजंतवस्सर्वेबद्धाःस्वाभाव्यविद्यया॥३॥ मोक्षस्त्वेतेषांतारतम्यंघटेतरखयोरिव॥
पुनर्देहांतरारंभकारणंनास्तिकिंचन॥ सालोक्यादेर्नविद्वद्भिःसाक्षान्मोक्षत्वमिष्यते॥४॥ उपास्तेःपररूपत्वा
त्तारतम्यपदस्थितेः॥ ज्ञानाग्निनाविनष्टत्वाद्विश्लेषःपूर्वकर्मणाम्॥५॥ उत्तरेषांनविश्लेषोभवेन्मुक्तस्यजीव
तः॥ प्रारब्धंकर्मभोगेनक्षीयतेज्ञानकारणम्॥६॥ ततोविदेहकैवल्यंभवतीतिसुनिश्चितम्॥ काश्यांविदे
हकैवल्यंभवतीतिसुनिश्चितम्॥७॥ काश्यांविदेहकैवल्यप्राप्तेरुत्तरकर्मणाम् असंभवान्नविश्लेषोवेदित
व्योविचक्षणैः॥८॥ किमत्रप्रमाणंश्रूयतेहितद्यथेषीकातूलमग्नौप्रोतंप्रदूयेतएवंहास्यसर्वेपाप्मानःप्र १

दूयंतइति॥ नोक्तंपापकर्मणामेवविलयःश्रूयते नतुपुण्यकर्मणामितिचेन्नेत्याह ब्रह्मादीनांशरीराणिश्वसूक
रशरीरवत्॥ यतोजिहासितान्येवतस्माद्धर्मेपिपापगीरितिवचनात॥ पुण्यकर्मारब्धानांब्रह्मेन्द्रशरीराणांपा
पकर्मारब्धश्वसूकरशरीरादिवजिहासितत्वाविशेषात्पुण्यस्यापिकर्मणःपापत्वेनकीर्तनमुक्तं तथाच
भगवतासमर्थ्यते यथैधांसिसमिद्धोग्निर्भस्मसात्कुरुतेऽर्जुन ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा
यच्चोक्तंजीवन्मुक्तस्यज्ञानोत्तरकालीनकर्मणांविश्लेषोनभवतीतितत्रेदंप्रमाणं॥ यथापुष्करपलाश
आपोनश्लिष्यंते एवंहैवंविदिपापंकर्मनश्लिष्यतेइति॥ प्रारब्धस्यचकर्मणःकर्मत्वाविशेषात् ज्ञानेनवि
ध्वस्तमुत्पद्यतेइतिचेन्नेत्याह प्रारब्धस्योपजीव्यत्वात्तत्त्वज्ञानेनकर्मणः॥ क्षणकालाच्चमुक्तेर्योरि
ववाधोनविद्यतेइतिवचनात॥ अथेदानींपरमप्रकृतेःप्रमाणंप्रतिपद्यते॥ मर्माघवस्तताराजायस्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वी. मो. नि. २

वैषहृदिस्थितः ॥ तेनचेदविवादस्तेमागंगांमाकुरून्गमइतिगंगाकुरुक्षेत्रयोर्निषेधमुखतोमुमुक्षुप्राप्य 6
त्वमाहस्मभगवानार्य्योमनुः यद्वैकिंचनमनुरवदत्तद्भेषजमितिश्रुतेः ॥ यमः यमयतिनियमयति ॥ तथा
चश्रुतिः य आत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरीरंय आत्मानमंतरोयमयति एषतेआ
त्मांतर्याम्यमृतइति ॥ वैवस्वतः विवस्वान्पिताऽस्येतिविवस्वंतमधितिष्ठतीत्यर्थः राजाराजतेदीप्यतेस्वयं
प्रकाशते ज्योतिर्ब्राह्मणावाक्यात् तंज्योतिषां प्रत्यगात्मनः ॥ औपचारिकमन्यत्रभास्यत्वात्भास्वरादि
वदितिवचनात् यस्तवैषहृदिस्थितइति स्वानुभवप्रत्ययत्वं दर्शयति हृदिस्थितइतिसर्वेषांभूतानांहृद्दे २
शेसदासन्निहितः अंतः प्रविष्टः शास्ताजनानामितिश्रुतेः ॥ शास्ताविष्णुरशेषस्यजगतोयोहृदिस्थितइ
तिस्मृतेः तेतवयोहृदिस्थितस्तेनपरमात्मनाऽविवादऐकात्म्यंयदास्तितदागंगांकुरुक्षेत्रंचमागाः ॥ गंगायां

मरणंचैवदृढाभक्तिश्चकेशवे ॥ ब्रह्मविद्याप्रबोधश्चनाल्पस्यतपसः फलमितिसमप्रधानभावेनश्रीव्यासे 7
नोक्तं ॥ मरणेस्मरणंविष्णोः कथ्यतेऽत्यंतदुर्लभं तदस्येनहिकालेनगंगांसंसेव्यलभ्यतइति ॥ यस्यतत्त्वज्ञा
नंनास्तितस्यगंगायांकुरुक्षेत्रेवापावदेहावसानंनावर्तिष्यतोसत्यांतत्त्वज्ञानावाप्तौमोक्षोभवतीतिभावः
किंनामतत्कुरुक्षेत्रंयत्रदेहावसानेसर्वस्यजंतोर्मोक्षः श्रूयतेउच्यते बृहस्पतिरुवाचयाज्ञवल्क्यं यदनु
कुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमविमुक्तंवैकुरुक्षेत्रंदेवानांदेवयजनंसर्वेषांभूता
नांब्रह्मसदनंतस्माद्यत्रक्वचनगच्छतीतितदिदंमन्येदेवानांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमत्र
हिजंतोः प्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवति तस्मादवि
मुक्तमेवनिषेवेतअविमुक्तंनविमुंचेदेवमेवैतद्याज्ञवल्क्यः ॥ अथहैनमत्रिः पप्रच्छयाज्ञवल्क्यं यएषो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४

का॰मो॰ नि॰ २

नंतोव्यक्त आत्मा तत्कथमहमिमं विजानीयामिति सो विमुक्त उपास्य इति सो विमुक्तः कस्मिन्प्रतिष्ठित
इति वरणायां नाश्यां च प्रतिष्ठित इति का च वरणा भवति का च नाशी भवति सर्वानिंद्रियकृतान्दोषान्वा
रयतीति तेन वरणा भवति सर्वानिंद्रियकृतान्पापान्नाशयतीति तेन नाशी भवति कतमच्चास्य स्थानं भवतीति ।
भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीत्येतद्वै संधिं संध्यां ब्रह्मविद उपासत इ
ति सो विमुक्त उपास्य इति सो विमुक्तं ज्ञानमाचष्टे यो वै तदेवं वेदेति बृहस्पतिर्याज्ञवल्क्यं पप्रच्छ यदनुः
कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छतीति विश्वम्भरेण कदाचि
दपि मुक्तं न भवतीत्यविमुक्तं सर्वगतत्वेपि विशेषाभिव्यक्तिहेतोः वै एवार्थः कुरुक्षेत्रं कुरुक्षेत्रशरि
नं देवानां देवयजनं सर्वे देवा इज्यंते पूज्यन्त इति सर्वे देवा यत्र विश्वम्भरं यजंति पूजयन्ति वेति देवयजनं स

९

र्वेषां भूतानां ब्रह्मसदनं भवतीति भूतानि भवंति उत्पद्यंते उत्पत्तिमंति कानि तानि जरायुजांडजस्वेदजोद्भि
ज्जानि तेषां सर्वेषां भूतानां ब्रह्मसदनं ब्रह्मलोकः कस्मादविमुक्ताद्यत्र क्वचन गच्छति यत्र क्वापि न गच्छे
त्मा सार्थं क्षेत्रांतरव्यत्ययो बहुलमिति लकारव्यत्ययः अविमुक्तं परित्यज्य क्षेत्रांतरे मा सा न भवती
ति भावः तदिदं मन्ये देवानां देवसदनं सर्वेषां भूतानां ब्रह्मसदनं तत्तस्माद्देवानां देवयजनमिदमविमुक्तं स
र्वेषां भूतानां ब्रह्मसदनं ब्रह्मलोकं मन्ये ऽवगच्छति अत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्या
चष्टे अत्राविमुक्ते हि प्रसिद्धो जंतोश्चतुर्विधस्य जीवजातस्य प्राणेषूत्क्रममाणेषु प्राणेषूत्क्रांतिं कुर्वतः
प्राणेषूत्क्रममाणेष्विति केचित्पठंति ॥ रुद्रस्तापत्रयात्मकं संसारदुःखं रुत तद्दुःखहेतुर्वा रुत् रुद्रं द्रावयती
ति रुद्रः रुत् दुःखं दुःखहेतुर्वा द्रावयत्येष नः प्रभुः रुद्र इत्युच्यते सद्भिः शिवः परमकारणमिति स्मृतेः अशुभं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰ मे॰ नि॰ ४ द्रावयन्रुद्रोयज्ञहारपुनर्भवं ततः स्मृताभिधेयो रुद्रशब्देनात्राभिधीयतेइति च रुत्यावेदरूपयाधर्मादीन्बो
धयतिवारुद्रः ॥ रुत्याप्रणवरूपयास्वात्मानंप्रापयतीतिवारुद्रः रोरूयमाणोद्रवतिप्रविशतिमर्त्यानितिवारु
द्रः त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेशेतिश्रुतेः रोधिकाबंधिकाचशक्तिः रुत् तस्याद्रावयि
ताभक्तेभ्यइतिवाविग्रहः रुद्रः रुत्शब्दंवेदात्मानंकल्पादौब्रह्मणेददातीतिवारुद्रः योवैवेदांश्चप्रहिणो
तितस्माइतिश्रुतेः एवमादिभिःप्रकारैर्बहुधारुद्रशब्दोनिरूप्यते तारकं तारकः प्रणवस्तारयतीतितारःस्वा
र्थेकप्रत्ययः संसारसागरादुत्तारकंतारकंचतद्ब्रह्मेतितारकंब्रह्मोच्यते ॐमितीदंतद्ब्रह्मेतिश्रुतेः ॐमि
तीत्येतदक्षरमिदंसर्वमितिश्रुतेः ॐमित्येकाक्षरंब्रह्मेतिभगवान्व्याचष्टे उपदिशतियेनासावमृतीभूत्वा ४
मोक्षीभवति येनोपदिष्टेनज्ञानेनासौजंतुरमृतीभूत्वेत्यत्रामृतत्वंभावेच्चिर्नभवतिस्वतःसिद्धत्वात् अमृ

11

[illegible] तामर्त्यभावमापन्नोनिवृत्ताज्ञानतत्कार्योमोक्षीभवति मुक्तएवमुक्तोभवति ब्रह्मैवसंब्र
[illegible] विमुक्तश्चविमुच्यतइतिश्रुतेः तस्मात्तनोर्हेतोरविमुक्तमेवनिषेवेत अविमुक्तंनविमुंचेन्न
[illegible] एवमेवैतद्याज्ञवल्क्योबृहस्पतिनापृष्टः सन्नेवमेवैतद्वगंतव्यमित्युवाचयाज्ञव
[illegible] णांनस्थावरविषयमितिचेन्नेत्याह ओषधिवनस्पतयोयच्चकिंचप्राणभृदितिश्रुतेः
[illegible] प्राणिजंगमंचपतत्रिचयच्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितमितिश्रुतेः प्राणोत्क्रमणं
[illegible] अभिव्यक्तंस्थावरेष्वनभिव्यक्तमेतावानेवविशेषः भूतानांप्राणिनःश्रेष्ठाइतिमानववाक्यम
[illegible] अभिव्यक्त्याभिप्रायंप्राणित्वप्रतिपादनपरं षड्भावविकारत्वाविशेषात् प्राणित्वाविशेषात्स्थू
[illegible] णोपाधिमत्वाविशेषात् ॥ जंतुशब्दत्वाविशेषात्संसारचक्रेभ्राम्यमाणत्वाविशेषात् तथास्मर्यते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰मे॰
नि॰
५

12

स्यात्स्वं विपच्यमानायां पवादीनां यथैव हि सुराणां नारकाणां च तथोर्ध्वाधः प्रवर्तनमिति अत्राविमु
क्ते स्थावरजंगमात्मसर्वप्राणिनो मोक्षे धिक्रियंते संकोचकारणाभावात् अभ्यस्य ब्रह्मसदने श्रुत्यातात्प
र्यमुक्तत्वात्सर्वस्य बोध्यते जंतोर्मुक्तिरेकेन जन्मना तेन ब्रह्मलोकवाक्येन ब्रह्मलोकगता जनाः यथा सर्वे वि
मुच्यंते तथैवात्रापि जंतवः तत्र ब्रह्मोपदेष्टा स्यादत्र साक्षान्महेश्वरः तस्यापि परमाचार्यो यो ब्रह्माणमिति
श्रुतेः अथ हैनमत्रिः पप्रच्छय एषोनंतोव्यक्त आत्मा कथमहमिमं विजानीयामिति सोविमुक्त उपास्य इ
त्युवाच याज्ञवल्क्यः सोविमुक्तः कस्मिन्प्रतिष्ठित इति अत्रिः पप्रच्छ वरणायां नास्यां च मध्ये प्रतिष्ठित इत्यु
वाच याज्ञवल्क्यः वरणायां नास्यामित्यत्र विभक्तिव्यत्ययेन षष्ठी ज्ञातव्या का च वरणा भवति का च नासीति अ
त्रिः पप्रच्छ सर्वानिंद्रियकृतान्दोषान्वारयतीति वरणा भवति सर्वानिंद्रियकृतान्पापान्नाशयतीति नासीत्युवा ५

13

च याज्ञवल्क्यः सर्वानिंद्रियकृतानित्युभयत्र सर्वानिंद्रियकृतान्यापानिति लिंगव्यत्ययो बोध्यः वार
यतीति वारयतीति वारणा अस्यति निरस्यतीत्यसिः सर्वानिंद्रियकृतान्पापान्नाशयतीति नाशीति के
चित्पठंति स्पष्टमन्यत् कतमच्चास्य स्थानं भवतीत्यत्रिः पप्रच्छ भ्रुवोर्घ्राणस्य यः संधिरित्युवाच या
ज्ञवल्क्यः अत्र घ्राणशब्देन घ्राणवायुप्रचारकं घ्राणमूलमुच्यते वाराणसी भ्रुवोर्मध्यमविमुक्तं तयोर्भ्रु
वः अध्यात्मेवानिर्दिष्टं तद्भ्रुवो घ्राणस्य चांतरमिति भ्रुवोर्मध्ये प्राणमावेश्येति भगवद्वाक्यमपि अविमु
क्ते प्राणान्परित्यजतः परब्रह्मप्राप्तिं प्रतिपादयति द्युः परस्य लोकस्य संधिं संध्येति चोच्यते सैव सं
ध्या विमुक्ता रव्यातत्वेश्वरमुपासते सगुणब्रह्म वेत्तारं तेषां ज्ञानं स ईश्वरः आचष्टे चाविमुक्ता रव्यम
स्थलस्यैव सेवकाः जीवेश्वरविभागश्च प्रसंगात्प्रतिपाद्यते प्रकृतस्यापयोगित्वाच्छास्त्रदृष्टेन वर्त्मना ह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰मो॰ ष्टिस्वप्रकाशसच्चिदानंदबोधरूपमखंडमद्वितीयंपरंब्रह्मैकमेवजागर्त्तिनान्यत्किंचिदस्ति तथाचश्रू
नि यते आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषदिति सदेवसोम्येदमग्रआसीदेकमेवाद्विती
६ यंब्रह्मेतिच तन्माययाद्वैरूप्यंप्रतिपद्यते मायाचकार्यकारणरूपेणद्विरूपा कारणोपाध्युपहितंतच्चै
तन्यंतत्सर्वज्ञंसर्वशक्तिसर्वेश्वरंजगत्सृष्टिस्थितिप्रलयकारणंभवति कार्य्योपाध्युपहितंयच्चैतन्यं
तज्जीवसंज्ञमल्पशक्तिसंसारिपरतंत्रंभवति कार्योपाधिषुजीवशरीरेषुकारणोपाधीश्वरस्यकार्येषु
कारणानुवृत्तेरधिष्ठातृत्वमुपपद्यते द्वासुपर्णासयुजासखायाइतिश्रुतेः पयोपत्वमविद्यायामा ६
यायाश्चतथापरे प्रयोगेषुप्रसिद्धत्वान्मन्यंतेलोकवेदयोः शक्तिद्वयमविद्यायाः कल्पयंतिचतेततः
स्वाश्रयामोहिनीकाचिन्मोहिनीमपरामपि तमोमोहोमहामोहस्तामिस्रोह्यंधसंज्ञितः अविद्यापंचपर्वैं

षाप्रादुर्भूतामहात्मनः ब्रह्मादेवमनुष्येषुपशुषुस्थावरेषुच पंचधायाविमुक्तानावर्ततेचिरयाश्रया
तामविद्यांतथाभूतांभगवान्परमेश्वरः संहरत्युदयेनैवसहस्रांशुस्तमोयथा॥ जन्तोरत्रहिप्राणोत्क्रम
माणस्यरुद्रस्तारकंब्रह्मव्याचष्टेइत्यस्यायमर्थः वाराणसीमध्यवर्तिनांमनुष्यव्यतिरिक्तानांजंगमा
नांस्थावराणांचवाराणसीप्राप्तिस्थितिप्रलयकारणानांपुण्यकर्मणांभूयस्त्वात्प्रारब्धेनशरीरेणक्रिय
माणयोःपुण्यपापयोरसंभवात्प्रारब्धस्यकर्मणोभोगादेवपरिक्षयात् प्राणप्रयाणसमयेसर्वज्ञःसर्वश
क्तिरन्तर्यामीपरमकारुणिकःपरमेश्वरःस्वतःसिद्धमात्मरूपमविद्याप्रहाणादभिव्यंजयतिश्रव
गमयतीत्यर्थः तथाचश्रूयते योदेवानांप्रथमंपुरस्ताद्विश्वाधिकोयोरुद्रोमहर्षिर्हिरण्यगर्भंपश्यतिजा
यमानंसनोदेवःशुभयास्मृत्यासंयुनक्तीतीश्वरस्यसर्वशक्तिमत्त्वंचश्रूयते नतस्यकार्यंकारणंचवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

16

का॰मो॰ द्यते न तत्समश्चाभ्यधिकश्च विद्यते परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति म
नि॰ नुष्येषु ये जीवन्मुक्तास्तेषां प्राणोत्क्रमणं नास्ति न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंत इति श्रु
७ तेः ते यत्र क्वापि निवसंतः प्रारब्धकर्मक्षये विदेहकैवल्यं प्राप्नुवंति ये च सगुणब्रह्मोपासकाः ये
च केवलं फलनिरपेक्षाः संतः कर्मानुष्ठातारश्चोपासकाः ये च केवलं निरपेक्षाः संतः श्रुतिस्मृत्युक्त
स्ववर्णाश्रमोचितकर्मानुष्ठातारस्तेषां चत्वारिंशत्संस्कारैरशेषैरसंस्कृतत्वेपि अष्टभिरात्मगुणैर्युक्ता
नां प्राणप्रयाणसमये पूर्वोक्तन्यायेन भगवान्परमेश्वरस्तारकं ब्रह्मोपदिशति अन्येषामप्यशेषाणां गंगा ७
वगाहनदर्शनाभ्यां यज्ञदानतपोभिश्च यादृच्छिकैः पुराकृतैः कर्मभिः सुकृतैः ऊषरः पुण्यपापानां धन्या
वाराणसीपुरी इदं प्रियं यस्त्वत्र मतिप्रियं मे संसारजीवो ऊषरमूषराणां इति वचनाभ्यामूषरत्वेन प्रसिद्धे

17

अप्रभावेण च नष्टावशिष्टपापकर्मणः काम्यस्य पुण्यकर्मणो मुक्तिरेकेन जन्मनेति मुक्तेरवश्यं भावि
त्वात् प्रारब्ध एव शरीरे भोक्तव्यत्वोपपत्तेरत्युत्कटैः पुण्यपापैरिहैव फलमश्नुत इति वचनात् काश्यां
कृतयोः पुण्यपापयोरत्युत्कटत्वाद्वर्तमान एव शरीरे भोक्तव्यनियमाच्चानयोः पुण्यपापयोः फलदानाय
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति वचनात् मायावीप
रमेश्वरः प्राणप्रयाणसमयात्पूर्वं क्षणेनैकेनानेककालीनेष्टानिष्टकर्मफलोपभोगयोग्यशरीरांतराणु
प्रवेशं माययैवाद्धा चेष्टानिष्टान्स्वप्नकल्पान्भोगाननुभाव्य पश्चात्पूर्वोक्तन्यायेन तारकं ब्रह्मोपदिशती।
त्यवश्यमेवाभ्युपगंतव्यं तथा च सूतसंहितायाम् ईदृशी परमा निष्ठा गुरोः साक्षान्निरीक्षणात् कर्मसा
म्यत्वनाया सा सिद्धत्येव न संशयः कर्मसाम्ये कर्मणोः सुकृतदुष्कृतयोः फलभोगेन क्षयसाम्ये सतीत्य

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰मो॰ नि॰ ८

र्थः अन्यथाप्रत्यक्षश्रुतिविरोधात्प्रामाणोरुत्कमप्रमाणस्येति वर्तमानार्थविहितप्रत्ययसामान्यात् मुक्तिरे
केनजन्मनेतिवचनात् अत्रैवमृतमात्राणामितिमात्रचप्रत्ययेप्रयोगप्राबल्यात् नचातोऽवधानवं
तीतिवाराणसीमुक्तेः कालांतरव्यवधानाश्रवणात् श्रुत्यर्थानुगुणानामन्येषामपिवचनानांभूयसांसं
भवात् प्रमाणावंत्यदृष्टानिकल्प्यानिसुबहून्यपिवालाग्रशतभागोपिनकल्प्योनिःप्रमाणकइतिन्याया
त् पीनोदेवदत्तोदिवानभुंक्ते इतिवाक्येरात्रिभोजनमंतरेणपीनत्वानुपपत्तेर्यथारात्रिभोजनंकल्प्यते
तथैवात्रापिश्रुतिस्मृत्यन्यथानुपपत्त्यामुक्तिरेकेनजन्मनाजंतोरेष्टव्या जाग्रत्स्वप्नयोःकामफल
भोगेनकश्चिद्विशेषोस्ति तस्यत्रयआवसथास्त्रयःस्वप्नाइतिश्रुतेः मायाविमोहितानांक्षणेनैकेन ८
ग्रहान्तरपरिग्रहाविचित्राश्चानुभवाःश्रूयंते उक्तंचवाशिष्ठे यथास्वप्नमुहूर्तेस्यात्संवत्सरशतभ्रमः

स्तथामायाविलासोत्थोजायतेजाग्रतिभ्रमः उक्तंचसंक्षेपशारीरके सुप्तोजंतुःस्वल्पमात्रेपिकालेको
टीः पश्येद्वत्संवत्सराणां कोटीःपश्येदेवमागामिकानांजाग्रत्कालेप्याजयेत्सर्वमेतत् शैवागमेपि क
पालमिन्दुःकारिचमेनागाः काशीपुरीकंठगतस्यजंतोःमूर्च्छासुमूर्च्छासुपरिस्फुरंतिसंज्ञासुसंज्ञास्तुतिरोभ
वंति काशीखंडेपि कृत्वाकर्माण्यनेकानिकल्याणानीतराणिच तानिक्षणात्समुत्सिप्य काशीसं
स्थोमृतोभवेत् महापापौघशमनींपुरापापचयकारिणीम् भुक्तिमुक्तिप्रदांमत्वेकोनकाशींसुधीःश्र
येदिति पुराणांतरेष्वपिस्मर्यते तथाहि भगवन्मायाविमोहितःकदाचिन्नारदःकन्यात्वमवापतां
कश्चिद्दुरवाहयत्तदापुत्रान्बहूनजनयत् सांसारिकंचदुःखमनेककालीनमन्वभूद्भर्तुःपुत्राणांच
वियोगायेनशोकेनपुनर्नारदएवासीदिति स्कंदपुराणे गंगातटेवसन्कश्चिन्मुनिर्मायाविमोहितः कि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का·मो रातकन्यासमभवत् तस्याः पाणिं किरातः कश्चिद्गृहीत् साचपुत्रान्बहून्प्रासूत पौत्रांश्चापश्यत्सा
नि· कदाचिदुदकाहरणाय गंगातीरमुपासीत्किरातजातिस्वाभाव्याद्वासः कुंभंचतीरेनिधायगंगायांप्रावि
९ शत् प्रविष्टमात्रास्नातानेकेनसएवमुनिरभवत् विलंबितांतामालक्ष्यतद्भर्तृपुत्रसंबंधिबांधवास्तीरे
शमागत्यवासः कुम्भंतदीयंदृष्ट्वागंगाप्रवाहेणसानीतेतिनिश्चित्यमहांतंप्रलापंचक्रुः ततस्तेनमु
निनासोऽहमस्मीतिप्रबोधिताः प्रकृतिस्थानाभवन् अथविज्ञानैर्बहुभिः प्रबोध्यमानाः यथागतं
सत्यमित्थमेवेतरितिशोकंपरित्यज्यागच्छन्निति वाराहपुराणे तथास्तवर्णाख्योराजाकश्चित्स
त्रिसामंतनृपतिभूपस्यांसभायांसिंहासनस्थोमायाविनाकेनापिविमोहितस्तदानींमायादर्शितम ९
श्वरत्नमधिरुह्यसमस्तांपृथिवींबभ्राम अथजविनातेनजातितः कस्मिंश्चिद्विजनेऽशयिष्ट क्षुत्तृषा

परीतश्चापमरणापेक्षापारंकिंचित्कुर्वतः पितुः कृतेपानीयमन्नंचाहरायगच्छन्तींचांडालकन्यका
मपश्यत् तदंतिकमुपसृत्याब्रवीत् क्षुत्पिपासार्दितस्यमेस्तोकमन्नंपानीयंचदेहि इतिसाचैन
मुवाचत्वंचेन्ममभर्ताभविष्यसितर्हिदास्यामीतितथेत्यभ्युपगम्यअथैकदेशस्थमन्नमभक्षयत् पा
नीयंचापिबत् ततः सातत्पितुरंतिकंनीत्वावृत्तांतमावेदयत्तेनानुज्ञाताभाविनाभर्त्रासाकंस्वभवनमया
सीत् मातृभ्रातृभगिनीनांचैनमदर्शयत् तेचतांचैनमभ्यनंदन्नमंस्ततांचोद्वाहविधिनापर्यग्रहीत्
तयासहचिरकालमुवास तस्यांपुत्रान्बहूनुदपादयत् अथपुनः कालेनगच्छतादुर्भिक्षोपहतस्त
स्माद्देशात्तयाभार्ययाताभिश्चप्रजाभिः सार्द्धंदेशान्तरमयासीत् सकदाचिन्निर्जलेप्रदेशेकस्मिंश्चिद्
क्षुत्पिपासार्दिताभिः प्रजाभिर्भार्ययाचसार्द्धंपरिश्रांतोऽशयिष्ट ताताऽन्नंपानीयंचदेहीतिक्षु।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

22

मो.
ने.
१० त्यिपासितैः शिशुभिः प्रार्थ्यमानस्तेभ्यस्तदानीं तद्दातुमुपायं कंचिदलभ्यमानस्तेषामार्तिपरवशं वचस्सो
ढुमशक्नुवन् बलादेधांस्याहृत्य सन्निपात्य प्रज्वाल्य पद्यं शरीरमेतं भक्षयंत्विति बुद्ध्या ज्वालाजटिल
मग्निं प्राविशत् ततः क्षणाद्दुन्मील्याक्षिणी विस्मयाविष्टः क्षणेनैकेन तद्वृत्तं मंत्रिसामंतनृपतिभ्यः।
कथयामासेति कथावासिष्ठरामायणे एवंजातीयकाः संत्यन्याश्चानेकशः कथाः एवमुक्तप्रकारेणाक
ष्ट्यामपि केषांचित्स्मर्यमाणः शरीरांतरप्रवेशः कालभैरवयातनाद्यनुभवश्चमायामय एवेत्यभिज्ञैरवगंत
व्यं अयमर्थः सनत्कुमारसंहितायां स्पष्टः अत्रैव पापैः सहचेन्मृतास्सौ न जन्ममृत्यू लभते त्ववश्यं॥ १०
कालेन मया मगणैः फलेषु नियोजितस्तत्सकलं प्रयुज्य अस्मिनकालेन समस्तमेव सार्थं पुरारु
द्रपिशाचरूपैः भवप्रसादेन कृतोपदेशः पिशाचयोनेरपि मुक्तिमेति यथात्र पुण्यं कृतमक्षयं स्यात्तथात्र

23

पापं न तयोर्विशेष इति श्रुतिनिंदार्थवादः अन्यथा सर्वेषां मनुष्याणां पुण्यपापयोरल्पयोर्वा संभवा
त्तयोरक्षयत्वस्यांगीकारे न कस्यापि मुक्तिः स्यात् तदत्र मुक्तिप्रतिपादकयोः श्रुतिस्मृत्योर्वैयर्थ्यं स्यात्।
अतो हेतोः काश्यां कंचित्कालं उषित्वा बहिर्गत्वा यो म्रियते तेन तद्विषयमेव तदित्यवगंतव्यं वाराणस्यां कृ
तं पापं वज्रलेपो भविष्यतीत्यपि वचनं तथैवमंतव्यं पापकर्मा कश्चित्काश्यां म्रियते पुण्यकर्मा वहि
र्म्रियते इति नैवं विज्ञानवद्भिर्विचारणीयम् एकस्मिन्नेव जन्मनि पुण्यपापयोः परिच्छेत्तारो वयमन्ना
दौ संसारे मनोवाक्कायैः पुण्यपापयोः परिच्छेत्ता परमेश्वरः तथा च ब्रह्मवैवर्ते स्कंदेनोक्तमगस्त्यं प्रति
नज्ञायते सूक्ष्मतरं हि किंचित्कर्मास्ति लोकस्य सुदुर्विभाव्यं योगादियज्ञादितपोभिरुग्रैर्यत्कस्यतेसं
प्रतिनास्ति काशी नज्ञायते कस्यकिमस्ति पुण्यं स्वल्पोपि काश्यां तनुभृत्तदास्ते॥ देवाः क्षयोपि प्रभवंति नै

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰मो॰
नि॰
१२

२४

वस्यांतुस्मरणंकाशिकायांकुर्वीत इति कृतप्रयत्नोपिसंसारकंब्रह्मोपदिशतीत्यवगंतव्यं अंतर्वहिः क
रोतीतिचप्रतिनियतैववस्तुशक्तिः यथाग्नेर्दाहकशक्तिस्तथाकाश्यांमोचकशक्तिःप्रतिनियतैव यथासु
तोपयोवाहान्पतितानजलबिंदवः मुक्ताःस्युस्तथाकाश्यांसंस्थितास्सर्वेपिजंतवः कीटाःपतङ्गाःपशव
श्चवृक्षाजलेस्थलेपिविचरंतिजीवाः मंडूकमत्स्याःकृमयोपिकाश्यांत्यक्त्वाशरीरंशिवमाप्नुवंति पुण्या
निपापान्यखिलान्यशेषंसार्थंसबीजंसशरीरमार्ये इहैवसंहृत्यददातिबोधंयतःशिवानंदमवाप्नुवंति
सूच्यग्रमात्रमपिनास्तिममास्यदेसिन्स्थानंसुरेश्वरि मृतस्यनयत्रमोक्षः भूमौजलेवियतिवासुचिमे
ध्यतोवासर्पाग्निदस्युपविभिर्निहतस्यजंतोः स्थिराकाश्यामिहैवैकाप्रतिज्ञाहिमयाकृता अत्रैवमृतमा ११
त्राणांतिरश्चामपिदेहिनां भक्तानामप्यभक्तानांपुण्यपापात्मनामपि मुक्तिंदास्यामिसर्वेषांभक्तानामेव

62.208

२५

सावहिः विनायोगैश्चविनापिपुण्यैर्विनापिदानैःसहितोपिपापैः मृतः प्रयात्येवहियत्रतत्रमामे
वनिर्दग्धसमस्तदोषः अत्रसाक्षान्महादेवोदेहांतेस्वयमीश्वरः व्याचष्टेतारकंब्रह्मजंतूनामपवर्गदः
सनत्कुमारसंहितायाम् महात्मनांशान्तमनोयाधनानांशापोग्रमुनीनामपियत्रभग्नः॥ तत्सैवमासाधुमहानि
धानंवणीजनाप्यत्रवसन्कृतार्थः योगोत्रनिद्राक्रतवःप्रचाराःस्वेच्छाशनंदेविमहानिवेद्यंलीलात्म
नोदेविपवित्रदानंजपःप्रजल्पःशयनंप्रणामः नोसंसृदुर्लभंमत्वासंसारंचातिभीषणं अश्मनाच
रणौहत्वावाराणस्यांवसेन्नरः इदंकलियुगंघोरंसंप्राप्तेपांडुनंदन गतिमन्यांनपश्यामिमुक्त्वावाराण
सींपुरीं जपध्यानविहीनानांज्ञानविज्ञानवर्जिनां तपस्युत्साहहीनानांगतिर्वाराणसीनृणां अस्यत
सिंधारयोर्निश्रेयसैकभूमौविजेनावरणावरणयावाराणसीमध्यगतातयोश्चनिश्शेषपयस्वरताप्रभवात् अनि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

का॰मो॰ 26

नि॰ द्मुद्यमाद्यंधामवामार्द्धकांतंस्वमहिमरसिकंयत्स्वानुभूत्यैकमानं ध्वनघरतमपास्तद्वैतमात्मावबोधं।

१२ प्रकटयतिपशूनांकालपाकेनकाश्यां जन्मान्तरसहस्रेषुमोक्षोलभ्येतवानवा इहैवलभ्यतेजंतोर्मु।

क्तिरेकेनजन्मना गर्भाधानाद्यखिलमपि यत्कर्मजातंद्विजानामेकंन्यूनंमुनिमपिमुनेपातयिष्यत्यवश्यं॥

नोचेत्स्वर्गादिषुफलमदः सर्वशास्त्रेषुसिद्धंतस्मात्काश्यांकथमपिवसेद्बुद्धिमान्मुक्तिसिद्धौ काशिःश्रीम

तिसर्वकर्मशमनीस्वाभाविकीकाचनप्रत्यक्संतवशक्तिरस्तिमहतीमातर्मही मण्डले ॥ यत्स

र्वेत्रसदावसन्नपिशिवस्त्वय्येवलब्धास्पदंविश्वंतारयतेविशेषविमुखः पारंभवांभोनिधेः आब्रह्मणो १२

ऽनंतभवेषुपुण्यमह्नावनोपार्जितमस्यमल्पं तत्तद्दशाद्यद्यविमुक्तमेकं कदाचिदायातिममप्रसादात् तीर्था।

निसर्वाण्यपिमोक्षदानिश्रुतानिसर्वेष्वखिलेषुराजन् वाराणसीप्राप्तिफलानिशीघ्रंकालेनचांतोप्यव।

नंवेति यथाचार्यैस्त्रिपुरविजयीसाधनानां चतुर्णांसंपद्यामः सुलभमशनंस्वैरचारस्तपांसि श्रोतव्यस्यगु

पितपः श्रूयतेजन्मभाजांकालेकाश्यासुकृतथनिकास्तत्रवासंलभंते जन्मांतरसहस्रेषुसंचितैः पु 27

कर्मभिः प्राप्तावाराणसीरम्याप्रसादात्परमेश्वरात् येकाश्यांसंश्रयाविष्टामुक्तास्तेषांशरीरिणाम्॥

णाप्रयाणसमयेप्रमाणंपरमेश्वरः मोक्षस्यनिर्णयः काश्यामित्थमेकेनजन्मना सर्वेषामेवजन्तू।

नांप्रमाणैः प्रतिपादितः किंबहुक्तेन येनकेनापियः कश्चिन्निमित्तेनपरित्यजेत् काश्यांप्राणान्सर्वेजं

नुर्मुक्तइत्यवगम्यताम्॥ इतिश्रीसुरेश्वराचार्यविरचितः सकलश्रुतिस्मृतिनिर्द्धारितः काशीमोक्षनि १२

णयसमाप्तः॥ विश्वेश्वरोजयतिविश्वविमुक्तिहेतुः काशीनिवासरसिकः करुणासमुद्रः यत्पादप

द्मयुगसौरभस्नापितस्यजंतोर्भवत्यकृतकंशिवसामरस्यं॥१॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005538

काशीमोक्षनिर्णय

005538

श्रीकाशीविश्वनाथपुरीमेढुंढिराजगणेशपरदाऊजीकेछापाखानेमे काशी मोक्षनिर्णयहस्तुच्चामहाराजवहादुरीछपाया संसारकेलीये॥ समाप्तः

संवत१९४२मि चै कृ ३०॥

१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

30

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA